"यो ज्येष्ठो ज्येष्ठवृत्तिः स्यान्मातेव स पितेव सः ।
अज्येष्ठवृत्तिर्यस्तु स्यात् स सम्पूज्यस्तु बन्धुवत्" ॥
इति मानवे ९ अध्याये ११० श्लोकः ॥
यो ज्येष्ठोऽनुजेषु पितृवद्वर्त्तेत स पितेव मातेव अगर्हणीयो भवति । यः पुनस्तथा न वर्त्तेत स मातुलादिवदर्च्चनीयः । इति तट्टीकायां कुल्लूकभट्टः ।

अजैकपात्, [द्] पुं, (अजस्य छागस्य एकः पाद इव पादो यस्य सः बहुव्रीहिः अलोपः) एकादशरुद्रान्तर्गतरुद्रविशेषः । इति शब्दमाला ॥ (हरिवंशे,—
"अजैकपादहिर्ब्रध्न स्त्वष्टा रुद्रास्च भारत ।
एकादशैते कथिता रुद्रास्त्रिभुवनेश्वराः" ॥)

अजैकपादः, पुं, (अजस्य छागस्य एकः पाद इव पादो यस्य सः विकल्पे अलोपः) रुद्रविशेषः । इति जटाधरः ॥ छन्दोऽनुरोधादसन्धिरपि विष्णुपुराणे चन्द्रकलापप्रस्तावे अजएकपादिति ॥ (यथा भारते ।—
"अजैकपादहिर्ब्रध्नो विरूपाक्षः सुरेश्वरः ।
जयन्तो बहुरूपश्च त्र्यम्बकोऽप्यपराजितः ।
वैवस्वतश्च सावित्रोहरोरुद्रा इमे स्मृताः")

अज्जुका, स्त्री, (अर्ज्जयति नायकादर्थमुपार्ज्जयति या अर्ज्जि+समिक स इति बाहुलकादुकन् रस्य ज) नाट्योक्तौ वेश्या । इत्यमरः ॥ (एसा अज्जु आ हि अ एन किम्पि आलिहन्ती चिट्ठदि मृच्छकटिके ।)

अज्झटा, स्त्री, (करट इति वत् उज्झति सर्व्वदोषान् नाशयति या उज्झ+कर्त्तरि अटन् स्त्रियां टाप् पृषोदरादित्वात् उकारस्य अः । यद्वा, अदव्ययमाश्चर्य्ये अत् आश्चर्य्यकारी झटः सङ्घातोऽस्याः । अत्ति क्विप् झटति झटसंघाते अच् । टाप् । असौ झटा च वा ॥
("अम्लं समधुरं तिक्तं कषायं कटुकं सरम् ।
चक्षुष्यं सर्व्वदोषघ्नं वृष्यमामलकीफलम्" ॥
इति सुश्रुते ।) भूम्यामलकी । इत्यमरः ॥

अज्झलं, क्ली, उज्झति अस्त्रं वारयति या उज्झ+कर्त्तरि अलच् पृषोदरादित्वात् उकारस्य अकारः) फलकं । ढाल इति ख्यातं । इति हेमचन्द्रः ॥ (पुं, अङ्गारः, कोकिलः ।)

अज्ञः, त्रि, (ज्ञा+कर्त्तरि कः नज्ञः नञ्समासः ।) जड़ः । मूर्खः । इत्यमरः । (यदुक्तं,—
"अज्ञो भवति वै बालः पिता भवति मन्त्रदः ।
अज्ञं हि बालमित्याहुः पितेत्येव तु मन्त्रदं" ॥
यथा षाण्डेऽफलं दानं तथा विप्रोऽनृचोऽफलः ।
इदं शरणमज्ञानां ।
"अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणोवराः ।
धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः ॥")

अज्ञानं, क्ली, (ज्ञा+भावे ल्युट् नज्ञानं नञ्समासः) विरुद्धज्ञानं । तत्पर्य्यायः । अविद्या २ अहम्मतिः ३ । इत्यमरः ॥ सृष्टिकाले ब्रह्मा प्रथमं पञ्चप्रकारमज्ञानं ससर्ज । यथा । तमः १ मोहः २ महामोहः ३ तामिस्रं ४ अन्धतामिस्रं ५ । इति श्रीभागवतं ॥ वेदान्तमते सदसद्भ्यामनिर्व्वचनीयं त्रिगुणात्मकं भावरूपं ज्ञानविरोधि यत्किञ्चित् । ज्ञानरहिते त्रि ॥ (यथा मनुः—
अज्ञानात् वारुणीं पीत्वा संस्कारेणैव शुद्ध्यति ।
अज्ञानात्प्राश्य विण्मूत्रं ।
अज्ञानात् बालभावाच्च साक्ष्यं वितथमुच्यते ॥)

अञ्चतिः, पुं, (अञ्चति गच्छति यः अञ्च+कर्त्तरि अति) वायुः । इति त्रिकाण्डशेषः ॥

अञ्चलः, पुं, (अञ्चति प्रान्तभागं गच्छति अञ्च+अलच्) वस्त्रप्रान्तभागः । आँचल इति भाषा । इति हलायुधः ॥ (यथा साहित्यदर्पणे ।—
"ऊरुः कुरङ्गकदृशश्चञ्चलचेनाञ्चलोभाति" ॥

अञ्चितः, त्रि, (अञ्च+कर्म्मणि क्तः नाञ्चेः पूजायामिति नलोपाभावः) पूजितः । इत्यमरः ॥ (यथा रघुवंशे ।—
"उभावलञ्चक्रतुरञ्चिताभ्यां
तपोवनावृत्तिपथं गताभ्यां ॥)

अञ्चितभ्रूः, स्त्री, (अञ्चिते उत्कृष्टे भ्रुवौ यस्याः सा बहुव्रीहिः) सुन्दरभ्रूयुक्तनारी । इति स्त्रीपर्य्याये राजनिर्घण्टः ॥

अञ्जनं, क्ली, (अन्ज+भावे ल्युट्, कज्जले तु गम्यमाने करणे ल्युट्) म्रक्षणं । गमनं । व्यक्तीकरणं । इत्यनट् प्रत्ययान्तानुजधात्वर्थः । कज्जलं । तत्तु षड्विधं । यथा,—
"सौवीरं जाम्बलं तुल्यं मयूरश्रीकरं तथा ।
दर्व्विका नीलमेघश्च अञ्जनानि भवन्ति षट् ॥
तल्लक्षणानि यथा"—
"श्वेतरूपन्तु सौवीरं जाम्बलं प्रस्तरं तथा ।
मयूरश्रीकरं रत्नं मेघनीलन्तु तैजसं ॥
दृष्ट्वा निगाह्य चैतानि शिलायां तैजसेऽथवा ।
प्रदद्यात् सर्व्वदेवेभ्यो देवीभ्यश्चापि पुत्रक ॥
घृततैलादियोगेन ताम्रादौ दीपवह्निना ।
यदञ्जनं जायते तु दर्व्विका परिकीर्त्तिता ॥
सर्व्वाभावे तु तां दद्यात् देवीभ्यो दर्व्विकाञ्जनं ।
महामाया जगद्धात्री कामाख्या त्रिपुरा तथा ।
आप्नुवन्ति महातोषं षड्भिरेभिः सदाञ्जनैः ॥
विधवा नाञ्जनं कुर्य्यात् महामायार्थमुत्तमं ।
नादत्ते त्वञ्जनं देवी वैष्णवी विधवाहृतं ॥
न मृत्पात्रे योजयेत्तु साधको नेत्ररञ्जनं ।
न पूजाफलमाप्नोति मृत्पात्रविहिताञ्जनैः ॥
चतुर्व्वर्गप्रदो धूपः कामदं नेत्ररञ्जनं ।
तस्माद्द्वयमिदं दद्याद्देवेभ्यो भक्तितो नरः" ॥
इति कालिकापुराणे ६८ अध्यायः ॥ अस्य गुणः । तारानैर्म्मल्यकारित्वं । निर्म्मलचन्द्रतुल्यनिराकुलदृष्टिकारित्वञ्च । इति राजवल्लभः ॥ सौवीराञ्जनं । रसाञ्जनं । अक्तिः । मसी । इति हेमचन्द्रः ॥ अग्निः इति विश्वः ॥ आलङ्कारिकभाषया व्यञ्जनाख्यवृत्तिः । यथा,—
"अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।
संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनं ॥
इति काव्यप्रकाशः ॥

अञ्जनः, पुं, (अनक्ति प्रतीच्यां दिशि रक्षकत्वेन प्रकाशते यः अन्ज+कर्त्तरि ल्युट्) पश्चिमदिग्हस्ती । अञ्जयति स्वेन शुभाशुभे सूचयति अन्ज+णिच्+ल्युट्) जोष्ठी । जेठी इति भाषा । इति विश्वमेदिन्यौ, (दिवा नतु प्रयोक्तव्यं नेत्रयोस्तीक्ष्णमञ्जनं । विरेकदुर्बलादृष्टिरादित्यं प्राप्य सीदति ॥ इति आगमः) ।

अञ्जनकेशी, स्त्री, (अञ्जनवत् केशोयस्याः सा बहुव्रीहिः स्त्रियां ङीप् यत्संयोगेन केशस्य कृष्णता भवेत्) हट्टविलासिनीनामगन्धद्रव्यं । इत्यमरः ॥

अञ्जना, स्त्री, (अनक्ति स्वकान्त्या शोभते अन्ज+युच् कर्त्तरि) वानरीविशेषः । सा च हनूमन्माता । इति मेदिनी ॥ (रामायणे,—
"अञ्जनेति परिख्याता पत्नी केशरिणः कपेः ।
अभिशापत्तयाञ्जाता पुनश्च दिवि चारिणी" ॥)

अञ्जनाधिका, स्त्री, (अञ्जनात् कज्जलादधिका कृष्णवर्णा) अञ्जनिका । इति हेमचन्द्रः ॥

अञ्जनावती, स्त्री, (अञ्जनं विद्यतेऽस्याः अतिकृष्णवर्णत्वात् अञ्जन+मतुप् स्त्रियां ङीप्) मतौ च बह्वचोऽञ्जनाजरादीनामिति दीर्घः मस्य वः) सुप्रतीकनामदिग्गजभार्य्या । इत्यमरः ॥

अञ्जनिका, स्त्री, (अञ्जनम् अञ्जनवत् वर्णोविद्यतेऽस्याः सा अञ्जन+अर्शआद्यच् स्त्रियां टाप् स्वार्थे कः ।) ज्येष्ठीविशेषः आँजनाइ इति । आञ्जिना इति च भाषा तत्पर्य्यायः । अञ्जनाधिका २ हालिनी ३ हलाहलः ४ । इति हेमचन्द्रः ॥ क्षुद्रमूषिका । इति जटाधरः ॥

अञ्जनी, स्त्री, (अनक्ति चन्दनकुम्कुमादिभिः शोभते अन्ज+कर्त्तरि ल्युट् स्त्रियां ङीप्) लेप्यनारी । चन्दनादिलेपनयोग्या । इति विश्वमेदिन्यौ ॥ कटुकावृक्षः । कालाञ्जनीवृक्षः । इति राजनिर्घण्टः ।

अञ्जलिः, पुं, (अन्ज+अलि अवध्याञ्जलिपुटमेवमिति वेणीसंहारनाटके) हस्तसम्पुटः । आँजला इति भाषा । कुड़वपरिमाणं । इति मेदिनी ॥ (यथा रामायणे । न प्रभातं त्वयेच्छामि निशे नक्षत्रभूषिते । क्रियतां मे दया भद्रे मयाऽयं रचितोऽञ्जलिः) ॥

अञ्जलिका, स्त्री, (अञ्जलि+स्वार्थे क) बालमूषिका । इति जटाधरः ॥ अञ्जनिका । इति च पाठः ॥

अञ्जलिकारिका, स्त्री, (अञ्जलेः कारिका) लज्जालुलता । इति राजनिर्घण्टः ॥ पुत्तलिका । इति हेमचन्द्रः ॥

अञ्जसः, त्रि, (अञ्ज+असच्) अवक्रः । ऋजुः ॥ इति हेमचन्द्रः ।

अञ्जसा अ (अञ्जं गतिं विलम्बम्वा स्यति नाशयति अञ्ज+सो+कर्त्तरि का) द्रुतं, शीघ्रं, यथार्थं, प्रहृतं, इत्यमरः । (यथामनुः,—
"आसमाप्तेः शरीरस्य यस्तु शुश्रूषते गुरुं ।
स गच्छत्यञ्जसा विप्रो ब्रह्मणः सद्म शाश्वतं" ॥)

अञ्जिः, पुं, (अन्ज+इन् । तिलकादिचिह्नम्) प्रेषणिकः । प्रेरकः । इत्युणादिकोषः ॥

अञ्जिष्ठः, पुं, (अनक्ति स्वतेजोभिर्जगत् प्रकाशयति